श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - ३

# वाक्यार्थज्योतिः

# Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः

**प्रो. अर्कनाथः चौधरी**

सम्पादकौ

**डॉ. ललितकुमारः पटेलः**

**डॉ. जानकीशरणः आचार्यः**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

Scanned with CamScanner

**प्रकाशकः -**

**डॉ. दशरथः जादवः**

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७

E-mail: sssu.veraval@gmail.com

www.shreesomnathsanskrituniversity.info

**समन्वयकः -**

**डॉ. कार्तिकपण्ड्या**

संशोधनाधिकारी

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University*, 2017

**प्रथमं संस्करणम्** - जनवरी - २०१७

**प्रतयः** - ३५०

**ISBN** - 978-93-83097-19-7

**मूल्यम्** - रु. २५०/-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ओफसेट

परमहंस अेपार्टमेन्ट के पास,

होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६

जि. गीर सोमनाथ, गुजरात (भारत)

दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

# मृच्छकटिके वर्णिता राज्ञः राज्यस्य च विभावना

✍ डॉ. महेन्द्रकुमार अं. दवे

मृच्छकटिकं प्रकरणप्रकारस्य रूपकमस्ति। मृच्छकटिकस्य राजधर्मस्य चर्चायाः पूर्व तस्य रचयितुः परिचय आवश्यकः अस्ति।

❋ **मृच्छकटिकस्य कर्ता शूद्रकः –**

मृच्छकटिकस्यैव प्रस्तावनायामभिहितं यदसौ महाकविः राजा शूद्रको जात्या द्विजोऽवर्तत। मृच्छकटिके प्रस्तावनायाम् उल्लिखितमस्ति यत् –

**द्विरदेन्द्रगतिश्चकोरनेत्रः पूरिपूर्णेन्दुमुखः सुविग्रहश्च।**
**द्विजमुख्यतमः कविर्बभुव प्रथितः शूद्रक इत्यगाधवसत्वः ॥**

अस्मिन् श्लोके वर्णितमस्ति यत् शूद्रकः गजराजगतिश्चकोरनेत्रः पूरिपूर्णेन्दुमुखः सुघटितशरीरः अगाधबलसम्पन्नः काव्यकलाकुशलो द्विजेषु श्रेष्ठः प्रसिद्धश्चाऽऽसीत्। अस्य कवेः प्रतिभा बहुमुखी। मृच्छकटिकस्य अवलोकनं कृत्वा कथयामि यत्– असावृग्वेदे, सामवेदे, गणिते, चतुः षष्टि सङ्ख्याकायां नृत्यगीतादिरूपायां विद्यायां नाट्यकलायां हस्तिशिक्षायां च निष्णातः आसीत्। शिवप्रसादादयं तत्त्वज्ञानमलभत अयं हि विचक्षणो विलक्षणो प्रमादरहितः तपोनिष्ठश्चासीत्। मृच्छकटिके दक्षिणदेशे प्रसिद्धखुण्टमोऽक नाणकादिशब्दप्रयोगं दृष्ट्वा विद्वांसः शूद्रकस्य जन्मस्थानं दक्षिणदेशे कल्पयन्ति। एवं विद्वज्जनाः शूद्रकस्य स्थितिकालं पञ्चमशताब्दीति मन्यन्ते।

महाकवेः दण्डिनो वामनमम्मटादिसदृशशूद्रकस्यापि रचना नूनमेवाऽस्ति। मृच्छकटिकस्य रचनामात्रेण शूद्रकेन विख्यातिः प्राप्ता। पञ्चम्यां षष्ठ्यां वा शताब्द्यां प्राप्तस्य शूद्रकस्य प्रकरणरत्नस्य मृच्छकटिकस्य परिचयात् प्राक् तस्य नामकरणस्य औचित्यविचारः परमावश्यकः अस्ति। ''मृदः शकटं मृच्छकटिकं, मृच्छकटकमधिकृत्य कृतं प्रकरणं मृच्छकटिकम्' इत्थंव्युत्पत्तिं कर्तुं शक्यते। क्रीडनकाय रोदनपरायणं बालकं रोहसेनं प्रसादयितुं वसन्तसेना स्वाऽऽभूषणानि शकटे स्थापयति। तर्हि 'सुवर्णशकटिकम्' इति नामकरणं कृतम्



अथवा 'वसन्तसेना चारुदत्तमित्येवाभिधानं कथं न विहितम्। तर्हि साहित्यदर्पणोक्तं नियमानुसारं ''नाटकनाम्ना गर्भितार्थप्रकाशकेन भाव्यम्। उपरोक्ते नामद्वये चमत्कारो नाऽभविष्यत्। अत एव मृच्छकटिकम् इति नाम सर्वथा युक्तिसङ्गतमस्ति।

अभिज्ञानशाकुन्तलं मृच्छकटिकञ्च इति नाटकद्वयस्य मिथो महत् साम्यं प्रतिभाति। यथा शकुन्तला दुर्वाससः कोपभाजनं भूत्वा नैकानि कष्टानि सहते तथैवात्र प्रथमाङ्कात् दशाङ्कपर्यन्तं वसन्तसेना शकारस्य कोपभाजनेन नैकानि कष्टानि सहते। शाकुन्तल-सदृशैव मृच्छकटिकेऽपि नायक-नायिकयोः मेलनं द्विवारं भवति। शाकुन्तलस्य पञ्चमाङ्के राजसभायाः दृश्यं आगच्छति। तथैव –

मृच्छकटिके न्यायालयस्य दृश्यमपि प्रतिभाति। परन्तु उभयोः नाटकयोः कथावस्तुषु महदन्तरं विद्यते। शाकुन्तले शकुन्तलया सह मेलितुं दुष्यन्तः प्रयत्नं करोति। मृच्छकटिके वसन्तसेना एव चारुदत्तेन सह मेलितुं प्रयत्नमाना दृश्यते।

प्रकरणप्रकारस्य मृच्छकटिके प्रथमाङ्के विदूषकचारुदत्तस्य कृते चूर्णवृद्धद्वारा प्रेषितं प्रावारम् आदाय आगच्छति। चारुदत्तश्च विदूषकं चतुष्पथे मातृभ्यो बलिमुपाहर्तुं प्रेरयति। परन्तु विदूषको रात्रौ चतुष्पथे गमनात् बिभेति। अतः चारुदत्तस्तेन सह रदनिकां प्रेषयति। अत्रैव च राजमार्गे वसन्तसेनां अनुकुर्वन्तः शकारविट-चेटादयः आगच्छन्ति। तदा शकारस्य कथनेन वसन्तसेना चारुदत्तस्य गृहसमीपे एवास्ति इति ज्ञात्वा आत्मानं रक्षितुम् वसन्तसेना चारुदत्तस्य गृहं प्रविशति। इतश्च रदनिकामादाय मैत्रेयो मातृबलिं दातुं गच्छति। तत्र च शकारो रदनिकां वसन्तसेना मत्त्वा धरति। मैत्रेयस्तं भत्सर्यति। वसन्तसेना चारुदत्तस्य गृहं प्रविश्यात्मानं रक्षति स्वाभूषानि तत्रैव न्यासत्वेन स्थापयति च।

❋ **मृच्छकटिकस्य कथासारः –**

प्रथमाङ्के चारुदत्तस्तु दानवीरतायाः निर्धनोऽऽभूत्। वसन्तसेना गणिका तथाऽपि गुणानुरक्ता एतेन कारणेन वसन्तसेना कामदेवाय आयतनोद्याते चारुदत्तम् अवलोक्य तस्मिन्ननुरक्ता।

द्वितीयाङ्के द्युते पराजितः संवाहकः चारुदत्तस्य भृत्यो इति ज्ञात्वा वसन्तसेना स्वाभूषणानि प्रदाय संवाहकं मोचयति। विरक्तो संवाहको बौद्धभिक्षुः भवति।

तृतीयाङ्के चारुदत्तः मैत्रेयश्च सङ्गीतम् आकर्ण्य आगच्छतः। गृहम् आगत्य वसन्तसेनायाः आभूषणानि नीत्वा मैत्रेयः शयनं करोति तदा मदनिकां दासतापात् उन्मुक्तं शर्विलकः चारुदत्तस्य गृहम् आगत्य वसन्तसेनायाः आभूषणानि चोरयति।

Scanned with CamScanner

चतुर्थाङ्के सः आभूषणानि नीत्वा वसन्तसेनायै दापयति। वसन्तसेना मदनिकां सेवामुक्तं करोति। चारुदत्तस्य पतिव्रता स्त्री धूता स्वीयां रत्नावलीं चारुदत्ताय ददाति। चारुदत्तः विदूषकद्वारा वसन्तसेनायाः गृहे रत्नावलीं सम्प्रेषयति।

पञ्चमाङ्के वसन्तसेना चेटीविटाभ्यां साकं चारुदत्तं प्रत्यभिसरति। अति-वर्षाः मार्गे भवति। साऽऽर्द्रशरीरा तत्र प्राप्नोति। रात्रौ विश्रामयति च। अस्या नाम अनुरागः।

नाटकस्य हार्दस्वरूपषष्ठाङ्के चारुदत्त-धूतायोः पुत्रः रोहसेनः यदा स्वर्णशकटार्थं दुराग्रहति। तदा वसन्तसेना स्वाभूषणानि तस्मिन् शकटे आरोपयति। परन्तु रोहसनेस्य दीनावस्था तत्र दृश्यते। पुष्पकरण्डक-उद्याने उपस्थितस्य चारुदत्तस्य याने पालकद्वारा बन्दीकृतः आर्यकः पलायनं भूत्वा आगच्छति। यानचालको वसन्तसेना उपविष्टा इति बुध्वा यानं नयति। मार्गे द्वौ रक्षकौ चन्दनको वीरकश्च यानं रुन्धतः। चन्द्रनकः आर्यकं दृष्ट्वा तस्य प्रार्थनां स्वीकृत्य रक्षणं करोति।

सप्तमाङ्के चारुदत्तः स्वयाने आर्यकं दृष्ट्वा सप्रेम तं प्रहिणोति। अष्टमाङ्के प्रवहण-विपर्ययस्य कारणेन वसन्तसेना शकारस्य याने उपविश्य शकारस्य समीपम् आगच्छति। तां विलोक्य शकारः अनुनय-विनयेन प्रणयं निवेदयति। परन्तु सा शकारस्य प्रणयभावं न स्वीकरोति। तदा क्रुद्धः शकारः वसन्तसेनां हत्वा पत्रराशौ निगूहति। वसन्तसेनाद्वारा रक्षितः संवाहकः बौद्धभिक्षुः तत्र आगत्य वसन्तसेनां पुनर्जिवितां करोति।

नवमाङ्के शकरो न्यायालये वसन्तसेनायाः हत्या चारुदत्तेनेव कृता इति विवादं प्रस्थापयति तेन कारणेन चारुदत्तस्य कृते मृत्युदण्डः श्राव्यते।

दशमाङ्के चाण्डालः चारुदत्तं वधस्थानं नयति। तदैव वसन्तसेनामादाय बौद्धभिक्षुः तत्र प्राप्नोति। सत्यम् उदघाटयति। इतः च पालकं हत्वा आर्यकः राजा भवति। तत्र मित्रं शर्विलकं च प्राप्नोति। चारुदत्तस्य स्थाने दुष्टशकाराय मृत्युदण्डः दीयते। किन्तु चारुदत्तस्तं क्षमते। राजा च वसन्तसेनां वधू शब्देन समलङ्करोति। ततः वसन्तसेना-चारुदत्तयोः विवाहो भवति।

* मृच्छकटिके राजधर्मः -

मृच्छकटिके पञ्चमाङ्के राजधर्मः प्रदर्श्यते। राजा राज्यस्य सर्वप्रधानम् अङ्गम्। राजानं विना राज्यस्य कल्पना कर्तुं न शक्यते। राजभिः स्वराज्यस्य सम्यक् सञ्चालनाय कतिपयाः धर्माः पालनीयाः भवन्ति।

धर्मशास्त्रकारैः राज्ञः धर्माः सविस्तरं विवेचिताः। सूर्यः स्वकिरणैः जलं आहरति।



वर्षाकाले तत् जलं सर्वत्र वर्षति तथैव राजा करं गृहीत्वा यथावसरं प्रजासु धनव्ययं करोति।[३] वायुसदृशः राजा गुप्तचरैः सर्वत्र प्रविश्य विचरति।[४] पृथिवी सर्वान् प्राणिनः समभावेन पालयेत्। राजा आलस्यरहितः, बुद्धिमान्, असन्तोषी, विनयी, सर्वदा यत्नशीलः एवं प्रमादरहितः[५], सगुणी भवेत् तदा स्वराष्ट्रस्य उन्नतिः भविष्यति इति भगवता मनुना कथितम्।[६] धर्मशास्त्रेषु राज्ञः सर्वप्रधानः धर्मः प्रजारक्षणमेव अङ्गीकृतः। गौतमः, कौटिल्यः, महाभारतानुशासनपर्व, शान्तिपर्व, विष्णुधर्मसूत्रम्, मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, मत्स्यपुराणम् इत्यादिषु अनेकेषु धर्मग्रन्थेषु राज्ञो धर्माः सविस्तरं वर्णिताः सन्ति।

मृच्छकटिकस्य काले राजा राज्यस्य सर्वतन्त्रस्वतन्त्रोऽधिकारी भवति स्म। राजा पालकः स्वतन्त्रधिया राज्यं शास्ति। तेन देशस्य स्थितिः चिन्तनीया आसीत्। प्रजाः दुरात्मानं राजानं विरुन्धति स्म। आर्यकेण दुरात्मा राजा पालको हतः। यथा-

**आर्यकेणार्यवृत्तेन कुलं मानं च रक्षता:**
**पशुवधज्ञवाटस्थो दुरात्मा पालको हतः ॥[७]**

वस्तुतः इदानीन्तनी शासनव्यवस्था समीचीना नास्ति। राज्ञः स्वकर्तव्यबोधाऽभावात् कर्मचारिणः स्वकार्यं सम्यक् न कारयन्ति। मृच्छकटिके वीरकचन्दनकयोः विरुद्धेन कार्यकलापेन राजकर्मचारिणाम् अवस्था प्रकाशे आगच्छति। शिथिलशासनेन राज्ये विद्रोहिणां संख्यावृद्धिः भवति। षड्यन्त्रस्य आधिक्येन राज्ञः पराभवो भवति स्म। यथा शत्रूभिः शंकया प्रियमित्रम् आर्यकः अकारणं कारागारे निपातितः। राजा पालकः समीचीनः शासको नाऽसीत्। असौ राज्ञः कर्तव्यं सम्यक् न पालयति। तस्य स्वसैनिकाः मन्त्रिणश्चापि सहायतां न कुर्वन्ति। राज्ञः परमं कर्तव्यं प्रजारक्षणमेव। तत्र कर्तव्यपालने असफलः पालकः विनाशं लभते। एतेन कारणेन शर्विलकः चिन्तयति यद् राजानं पालकं हत्वा द्रुतमेव आर्यकं राजसिंहासनेऽभिषिच्य तस्य आज्ञया दुःखनिमग्नं चारुदत्त मोक्षयिष्यामि।

मृच्छकटिककाले लघु-लघु प्रान्तरूपेण विभक्तेषु राज्येषु राजानः स्वेच्छाचारिणः आसन्। पालकोऽपि कर्मचारिणः निवेदनं स्वीकृत्य ब्राह्मणाय चारुदत्ताय वधदण्डं ददाति। सः विचार्य निर्णयं करोति। राज्ञः बलेन सम्बन्धिजनोऽपि स्वेच्छाचारितां कुर्वन्ति। शकारं दृष्ट्वा सरोवरे वस्त्रं प्रक्षाल्य समागत्य बौद्धसंन्यासी नितरां बिभेति। न्यायविषयेऽपि राजा अन्तिमोऽधिकारी। पालकः श्यालस्य शकारस्य पक्षपातार्थं न्यायधीशानां न्यायं तिरस्कृत्य निर्दोषाय चारुदत्ताय वधदण्डं ददाति।

गुप्तचरस्य कार्यं तु सर्वे अधिकारिजनाः जानन्ति एव। तस्य माध्यमेन कस्य

अपि गुप्तकार्यस्य स्थितिम् अधिकारिणः प्राप्नुवन्ति स्म। गुप्तचराणां दलमपि सेनायाम् आसीत्। तस्य माध्यमेन राजा राज्यस्य स्वसत्तायाश्च सुरक्षाप्रयासं करोति स्म।

यथा हि मानवशरीरं सुन्दरं किन्तु गुणाभावात् आदरपात्रं न भवति। तथैव योग्यस्य राज्ञोऽभावात् सर्वसम्पन्नं समृद्धम् अपि राज्यम् आदरणीयं न भवति[८], ह्रासं च गच्छति। मृच्छकटिके पराक्रमादयः कतिपयाः राज्ञो गुणाः सूचिताः। राजभिः स्त्र्यासक्तिपरिहारः सेवके स्वविश्वासः ब्राह्मणे भक्तिः कुमन्त्रिपरिहारश्चापि राज्ञो गुणाः धर्मशास्त्रे सूचिताः।[९] पालके राजनि एते गुणाः नासन्। सः शकारस्य भगिन्यां गाढमासक्तिं दधाति। अत एव तस्याः भ्रातरि शकारे विश्वासं करोति। एतेन कारणेन शकारः यथेच्छया निर्दोषमपि चारुदत्तं पीडयति।

धर्मशास्त्रेषु राज्यम्, राजा, अमात्यः, मित्रम्, कोषः, राष्ट्रम्, दुर्गम्, सेना (दण्डः) इत्यादीनि राजाङ्गानि वर्णितानि सन्ति। परं मृच्छकटिके राज्याङ्गानां स्पष्टतः गौणतः च वर्णनं लभ्यते। तस्मिन् काले राजानः परस्परं कलहायमाना आसन्। शासनव्यवस्था समीचीना नासीत्। मृच्छकटिककाले षड्यन्त्रस्य सन्देहाद् राजानः कमपि पुरुषं अनिश्चितकालाय कारागारे निपातयन्ति स्म। राज्ञा पालकेन आर्यकं सन्देहात् कारागारे निपातितः। स कारागारात् पलायते। सः शृङ्खलापाशयुक्तः चरति। तस्मिन् काले राज्यस्थितिः अशान्ता प्रतिभाति स्म। तस्मिन् काले राज्ञः स्वरूपद्वयम् आसीत्। केचिद् राजानः प्रमादशून्या वेदविदः तपोधनाः चाऽसन्। यथा शूद्रकः, अपरे तु निर्दया, विवेकहीना, अत्याचारिणः चासन् यथा पालकः।

राज्ये मन्त्रिणः तु प्राप्यन्ते परं च स्वकर्तव्यं सम्यङ्क्न निर्वहन्ति स्म। यदा निर्दोषाय ब्राह्मणाय चारुदत्ताय धर्मशास्त्रविरुद्धः वधदण्डो दीयते[११] तदा मन्त्रिणः राजानं धर्मविरुद्धं निर्णयाद् रोद्धुं नाऽपारयन्। अतः नृपस्य मन्त्रिणः कृते सुमन्त्रणायाः आवश्यकता वर्तते।[१२]

राजकोषः सुसमृद्धः आसीत्। करव्यवस्थाऽपि समीचीनाऽभूत्। सुरक्षाव्यवस्था तु दुर्बला। किन्तु नगरस्य सुरक्षाव्यवस्थायै सेनाऽऽसीत्। वीरको राजानं प्रति सर्वथा समर्पितः सेनापतिरस्ति। जय-जयमान-मङ्गल-पुष्पभद्रकादिरक्षकाः अपि चर्चिताः। सर्वे रक्षाधिकारिणः सावधानतया स्वकर्तव्यं पालयन्ति स्म। किन्तु तत्र अपवादोऽपि आसीत्। यथा चन्दनकः। मृच्छकटिकस्य राजनीतिविषयकं तत्त्वाधानं दृष्ट्वा कथयामि यत् तस्मिन् काले राज्यव्यवस्थायां सुसंकलनस्य अभावो दृश्यते। दुर्जनाः सज्जनेभ्यः विना अपराधेन दण्डादिकं ददति स्म। वस्तुतः मृच्छकटिककाले राजधर्मः सर्वथा सुयोग्यः नाऽसीत्।

***



## पादटिप्पणयः

(१) मृच्छकटिकम् - १-३

(२) (अ) 'सर्व धर्माः राजधर्म प्रधानाः। - महा. शान्तिपर्वणि - ६३/२५

(ब) युग प्रवर्तको राजा धर्माधर्मप्रशिक्षणात्। - शुक्रनीतिसारः - ६-१-६०

(३) यथाल्पाल्यमदन्त्याद्यं वार्योकोवन्सषट्पदाः।
तथाल्याल्यो गृहीतव्यो राष्ट्राशाब्दिकः करः॥ - मनुस्मृतिः ७/१२९

(४) दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।
इङ्गिताकारचेष्टसं शुचिं दक्षं कुलोद्गतम्॥ - मनुस्मृतिः - ७-६३

(५) दुष्टदण्डः सतां पूजा धर्मेण च धनार्जनम्।
राष्ट्ररक्षा समत्वं च व्यवहारेषु पञ्चकम्।
भूमिपानां महायज्ञाः सर्वकल्मषनाशनाः। - विष्णुधर्मोत्तरपुराणम् - ३-३२३

(६) (अ) यद्वै किञ्च मनुरवदत् तद् भेषजम्। - तैत्तिरीय संहिता - २-२-१०, २

(ब) मनुर्वै यत्किञ्चावदत्तद् भेषजताय॥ - तांड्यमहाब्राह्मणम् - २३-१६-१०

(७) मृच्छकटिकम् - १०-५१

(८) दशकामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्॥ - मनुस्मृतिः - ७-८५

(९) कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः।
तद्विरुद्धवृत्तिवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्योविस्यति॥
- अर्थशास्त्रम् १-६-४

(१०) (अ) न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचित्सुहृद्।
अर्थतस्तु निबन्धयन्ते मित्राणि रिपवस्तथा॥
- महा. शान्तिपर्वणि - १३८-११०

(ब) सामर्थ्यं योगाज्जायन्ते मित्राणि रिपवस्तथा॥
- विष्णुधर्मोत्तरपुराणम् - २-१४५

(११) उत्तिष्ठ भोः यतित साधुजनानुकम्पि निष्कारणोपगतबान्धव धर्मशीलः।
यत्नः कृतोऽपि सुमहान्मम मोक्षणाय दैवं न संवदति किं न कृतं त्वयाद्य॥
- मृच्छकटिकम् - १०-३१

(१२) (अ) मन्त्रो विजयमूलं हि राज्ञां भवति राघव। - अयोध्याकाण्डः - १००-१६

(ब) विजयो मन्त्रमूलो हि राज्ञां भवति भारत। - सभापर्वणि - ५-३७

***

Scanned with CamScanner